# श्री लक्ष्मीअष्टोत्तर शतनाम स्तोत्रं

**। देव्युवाच ।**

देवदेव! महादेव! त्रिकालज्ञ महेश्वरः ।
करुणाकर देवेश! भक्तानुग्रहकारक! ॥
अष्टोत्तरशतं लक्ष्म्याः श्रोतुमिच्छामि तत्त्वतः ।

**। ईश्वर उवाच ।**

देवि! साधु महाभागे महाभाग्यप्रदायकम् ।
सर्वैश्वर्यकरं पुण्यं सर्वपाप प्रणाशनम् ।
सर्वदारिद्र्यशमनं श्रवणाद्भुक्तिमुक्तिदम् ।
राजवश्यकरं दिव्यं गुह्याद्-गुह्यतरं परम् ।
दुर्लभं सर्वदेवानां चतुःषष्टिकळास्पदम् ।
पद्मादीनां वरान्तानां निधीनां नित्यदायकम् ।
समस्त देव संसेव्यं अणिमाद्यष्टसिद्धिदम् ।
किमत्र बहुनोक्तेन देवी प्रत्यक्षदायकम् ।
तव प्रीत्याद्य वक्ष्यामि समाहितमनाः शृणु ।
अष्टोत्तरशतस्यास्य महालक्ष्मीस्तु देवता ।
क्लींबीजपदमित्युक्तं शक्तिस्तु भुवनेश्वरी ।
अङ्गन्यासः करन्यासः स इत्यादिः प्रकीर्तितः ।

© 2022 Vedam Nadam

## । ध्यानम् ।

वंदे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
हस्ताभ्यामभयप्रदां मणिगणैर्नानाविधैर्भूषिताम् ।
भक्ताभीष्टफलप्रदां हरिहरब्रह्मादिभिः सेवितां
पार्श्वे पंकजशंखपद्मनिधिभिर्युक्तां सदा शक्तिभिः ॥

सरसिजनयने सरोजहस्ते धवलतरांशुकगंधमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥

ओं प्रकृतिं विकृतिं विद्यां सर्वभूतहितप्रदाम् ।
श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकाम् ॥ 1

वाचं पद्मालयां पद्मां शुचिं स्वाहां स्वधां सुधाम् ।
धन्यां हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीम् ॥ 2

अदितिं च दितिं दीप्तां वसुधां वसुधारिणीम् ।
नमामि कमलां कांतां कामाक्षीं क्रोधसंभवाम् ॥ 3

अनुग्रहप्रदां बुद्धिं अनघां हरिवल्लभाम् ।
अशोकां अमृतां दीप्तां लोकशोकविनाशिनीम् ॥ 4

नमामि धर्मनिलयां करुणां लोकमातरम् ।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुंदरीम् ॥ 5

© 2022 Vedam Nadam

पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमाम् ।
पद्ममालाधरां देवीं पद्मिनीं पद्मगंधीनीम् ॥ 6

पुण्यगंधां सुप्रसन्नां प्रसादाभिमुखीं प्रभाम् ।
नमामि चंद्रवदनां चंद्रां चंद्रसहोदरीम् ॥ 7

चतुर्भुजां चंद्ररूपां इंदिरां इंदुशीतलाम् ।
आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीम् ॥ 8

विमलां विश्वजननीं तुष्टिं दारिद्र्यनाशिनीम् ।
प्रीतिपुष्करिणीं शांतां शुक्लमाल्यांबरां श्रियम् ॥ 9

भास्करीं बिल्वनिलयां वरारोहां यशस्विनीम् ।
वसुंधरां उदारांगीं हरिणीं हेममालिनीम् ॥ 10

धनधान्यकरीं सिद्धिं स्त्रैण सौम्यां शुभप्रदाम् ।
नृपवेश्मगतानंदां वरलक्ष्मीं वसुप्रदाम् ॥ 11

शुभां हिरण्यप्राकारां समुद्रतनयां जयाम् ।
नमामि मंगलां देवीं विष्णुवक्षःस्थलस्थिताम् ॥ 12

विष्णुपत्नीं प्रसन्नाक्षीं नारायणसमाश्रिताम् ।
दारिद्र्यध्वंसिनीं देवीं सर्वोपद्रववारिणीम् ॥ 13

© 2022 Vedam Nadam

नवदुर्गां महाकालीं ब्रह्मविष्णुशिवात्मिकाम् ।
त्रिकालज्ञान संपन्नां नमामि भुवनेश्वरीम् ॥ 14

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरंगधामेश्वरीं
दासीभूतसमस्तदेववनितां लोकैकदीपांकुराम् ।
श्रीमन्मंदकटाक्षलब्ध विभवत् ब्रह्मेंद्र गंगाधरां
त्वां त्रैलोक्यकुटुंबिनीं सरसिजां वंदे मुकुंदप्रियाम् ॥ 15

मातर्नमामि! कमले! कमलायताक्षि!
श्रीविष्णुहृत्कमलवासिनि! विश्वमातः ।
क्षीरोदजे कमलकोमलगर्भगौरि!
लक्ष्मी! प्रसीद सततं नमतां शरण्ये ॥ 16

**। फलश्रुतिः ।**

त्रिकालं यो जपेद्विद्वान् षण्मासं विजितेंद्रियः ।
दारिद्र्य ध्वंसनं कृत्वा सर्वमाप्नोत्ययत्नतः ॥ 17

देवीनाम सहस्रेषु पुण्यमष्टोत्तरं शतम् ।
येन श्रियमवाप्नोति कोटिजन्मदरिद्रतः ॥ 18

भृगुवारे शतं धीमान् पठेद्वत्सरमात्रकम् ।
अष्टैश्वर्यमवाप्नोति कुबेर इव भूतले ॥ 19

© 2022 Vedam Nadam

दारिद्र्यमोचनं नाम स्तोत्रमंबापरं शतम् ।
येन श्रियमवाप्नोति कोटिजन्मदरिद्रितः ॥ 20

भुक्त्वा तु विपुलान् भोगान् अंते सायुज्यमाप्नुयात् ।
प्रातःकाले पठेन्नित्यं सर्वदुःखोपशांतये ।
पठंतु चिंतयेद्देवीं सर्वाभरणभूषिताम् ॥ 21

॥ इति श्री लक्ष्मीअष्टोत्तर शतनाम स्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam 